श्री ऋणमोचन नृसिंह स्तोत्रं

श्री ऋणमोचन नृसिंह स्तोत्रं

ध्यानं –

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि |

यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ||

अथ स्तोत्रं –

देवताकार्यसिद्ध्यर्थं सभास्तंभसमुद्भवं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 1 ||

लक्ष्म्यालिंगित वामांकं भक्तानां वरदायकं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 2 ||

आंत्रमालाधरं शंखचक्राब्जायुधधारिणं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 3 ||

स्मरणात् सर्वपापघ्नं कद्रूजविषनाशनं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 4 ||

सिंहनादेन महता दिग्विदिग्भयनाशनं | [दिग्दंति]

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 5 ||

प्रह्लादवरद श्रीशं दैत्येश्वरविदारणं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 6 ||

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 7 ||

वेदवेदांतयज्ञेशं ब्रह्मरुद्रादिवंदितं |

श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये || 8 ||

इत्थं यः पठते नित्यं ऋणमोचन सिद्धये | [संज्ञितं]

अनृणो जायते शीघ्रं धनं विपुलमाप्नुयात् || 9 ||

सर्वसिद्धिप्रदं नृणां सर्वैश्वर्यप्रदायकं |
तस्मात् सर्वप्रयत्नेन पठेत् स्तोत्रमिदं सदा || 10 ||

इति श्रीनृसिंहपुराणे ऋणमोचन श्री नृसिंह स्तोत्रं |